## केन्द्रीय विद्यालय का.हि.वि.वि. परिसर ,वाराणसी
### अर्धवार्षिक परीक्षा-2024-25

कक्षा – सप्तमी | विषयः – संस्कृतम्

**पूर्णांकाः – 60 अंकाः** | समयः – सार्धहोराद्वयम्

### खण्ड क- अपठित अवबोधनम् (05 अंका)

**प्रश्नः 1) अधोलिखितम् अनुच्छेदं पठित्वा प्रदतानां प्रश्नानाम् उत्तराणि लिखत-**

गङ्गा भारतस्य प्रमुखानदी अस्ति। गङ्गाया: अपरं नाम भागीरथी अस्ति। एषा नदी हिमालयात् निर्गच्छति । एतस्या: नद्या: तीरे बहव: तीर्था: मुनीनाम् आश्रमा: च सन्ति। हरिद्वारनगरम् प्रसिद्धम् तीर्थस्थानम् गङ्गा नद्या: तटम् अलङ्करोति ।अत्र अनेके देवालया: सन्ति।सायंकालस्य दृश्यम् तु अत्र अनुपमम् एव ।भक्ता: गङ्गादेवीं श्रद्ध्या पूजयन्ति, प्रज्वलितान् दीपान् च नद्या: जले प्रवाहयन्ति। यदा प्रज्वलिता: दीपा: जलेषु तरन्ति, तदा एवं प्रतीयन्ते यत् ताराणां समूह: आकाशात् अवतीर्य पृथिव्याम् आगत: । गङ्गानदी परमपावना नदी मन्यते ।

प्रश्नाः – (अ) **एकपदेनउत्तरत** **1×2=2**

(1) देशस्य प्रमुखा नदी **का** अस्ति ?

2) एषा नदी **कस्मात्** पर्वतात् निर्गच्छति ?

(ब) **पूर्णवाक्येनउत्तरत-** 1×1=1

(1) यदा प्रज्वलिता; दीपा: नद्याम तरन्ति तदा **किं** प्रतीयते ?

(स) **निर्देशानुसारम्उत्तरत-** 1×2=2

(1) "यदा प्रज्वलिता:दीपा; जलेषु तरन्ति" अस्मिन् वाक्ये **कर्तृ पदं** किम्?

(क) दीपा: (ख) जले (ग) प्रज्वलिता

(2) "गड्गानदी परमपावना नदी अस्ति "|अस्मिन्वाक्ये **क्रियापदं** किम्?

(क) अस्ति (ख) गड्गा (ग) परमपावना

---

### खण्ड – ख रचनात्मक-कार्यम् 10

**प्रश्न:-2) चित्रवर्णने मञ्जूषाया: सहायतया वाक्यानि पूरयत-** **1 x 5 = 5**



मञ्जूषाः - कन्दुकेन , वातावरणम् , वृक्षाः , उद्यानस्य , पुष्पाणि

(क) एतत् एकस्य--चित्रम् अस्ति (ख) अत्र बालकाः - क्रीडन्ति।
(ग) उद्याने - सन्ति। (घ) - च विकसन्ति। (ङ) उद्यानस्य --आनन्दप्रदम् अस्ति।

**प्रश्न– 3) अधोलिखितवाक्येषु संख्यां दृष्ट्वा विकल्पेभ्यःउचितं समयं चित्वालिखत–** 1x 5 = 5

(1) लता (5:30) ____________________ अध्ययनम् कृत्वा विद्यालयात् गृहम् गच्छति।

(अ) चतुर्वादने (ब) सपादचतुर्वादने (स) सार्धपञ्चवादने

(2) सा अवकाशे (12:00) ________________________ कन्दुकेन क्रीडति।

(अ) द्वादशवादने (ब) सपाद-एकादशवादने (स) एकादशवादने

(3) विद्यालयात् (2:30) ______________________ गृहम् आगत्य सर्वे भोजनं खादन्ति।

(अ) द्विवादने (ब) सार्धद्विवादने (स) पादोनद्विवादने

(4) सायं (6:00)__________________ अन्यैः छात्रैः सह क्रीडति।

(अ) षड्वादने (ब) पादोनसप्तवादने (स) सपादषड्वादने

(5) रात्रौ (10:00)___________ गृहकार्यम् करोति I

(अ) दशवादने (ब) पादोनदशवादने (स) सपाददशवादने

**प्रश्न 4 - मञ्जूषातः अङ्कानां कृते पदानि चिनुत–** ½ x 5 = 2½

**मञ्जूषा –(चत्वारिंशत्, सप्तविंशतिः, एकत्रिंशत्, पञ्चाशत् , अष्टाविंशतिः, त्रिंशत्, चतुर्विंशतिः।)**

| | | | | |
|---|---|---|---|---|
| क-28 | ख- 24 | ग- 30 | घ- 4 | च- 27 |

**(खण्ड – ग ) अनुप्रयुक्त-व्याकरणम् – 25**

**प्रश्नः5) अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं वचनं च लिखत–** ½ x 5 = 2½

| *पदानि* | *विभक्तिः* | *वचनम्* |
|---|---|---|
| (1) नारीणाम् | | |
| (2) पिता | | |
| (3) मनोरमया | | |
| (4) सभायां | | |
| (5) समृद्धेः | | |

**प्रश्नः 6) मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत–** ½ x 5 = 2½

**तथा, न, कदाचन, सदा, च**

(१) भक्तः _ईश्वरं स्मरति I (२) असत्यम् _वक्तव्यं I (३) प्रियं _सत्यं वदेत् I (४) लता मेधा _ विद्यालयं गच्छतः I (५) महात्मा गान्धी _ अहिंसा न अत्यजत् I

**प्रश्न– 7) उदाहरणानुसारम् लङ्लकारस्य प्रयोगं** 1 x 5 =5

यथा – वसति स्म = अवसत्

(१) पश्यति स्म (२) लिखति स्म (३) चिन्तयति स्म (४) वदति स्म (५) गच्छति स्म

**प्रश्न: 8) शुद्धकथनस्य समक्षम् 'आम्' अशुद्धकथनस्य समक्षं 'न' इति लिखत।** ½ x 5 = 2½

(क) अस्माकं राष्ट्रस्य ध्वजे त्रयः वर्णाः सन्ति। () (ख) ध्वजे हरितवर्णः शान्तेः प्रतीकः अस्ति ()

(ग) प्रात:काले ईश्वरं स्मरेत्। ( ) (घ) चक्रे त्रिंशत् अराः सन्ति। ( )

(ङ) मित्रेण कलहं कृत्वा जन: सुखी भवति। ( )

**प्रश्न: 9) मञ्जूषात: समानार्थकपदानि चित्वा लिखत-** ½ x 5 = 2½

| |
|---|
| शिलायाम् , पशव: , अम्बा , नेत्राणि, तूष्णीं |

(1) नयनानि (2) जन्तव: (3) माता (4) प्रस्तरे (5) मौनम्

**प्रश्न 10 मञ्जूषात :विलोम पदानि चित्वा लिखत्-**

½ x 5 = 2½

| |
|---|
| **नीचै :, सुलभं , उपरि , बहि : सुबुद्धेः!** |

i )अन्त : ii)अध : iii)दुर्बुद्धेः iv) उच्चै : v)दुर्लभम्

**पठित-अवबोधनम् -30**

**प्रश्न:11अधोलिखितं पद्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि निर्देशानुसारं लिखत- 5**

**सर्वदा व्यवहारे स्यात् औदार्यं सत्यता तथा ।**
**ऋजुता मृदुता चापि कौटिल्यं न कदाचन ।।**

(क) **.एकपदेन उत्तरत-** 1x2=2

i व्यवहारे कदाचन किम् न स्यात् ? (ii) सत्यता कदा व्यवहारे स्यात् ?

**(ख) .पूर्णवाक्येन उत्तरत-** 1 X1=1

i -व्यवहारे सर्वदा का का स्यात् ?

**(ग) भाषिक कार्यम्** 1X2=2

i-) **<u>सरलता</u>** इति पदस्य समानार्थकपदं किम् ?-

(क) मृदुता (ख) ऋजुता (ग) सत्यता

ii ) सर्वदा व्यवहारे स्यात् औदार्यं **इत्यत्र क्रियापदं किम्** ?

(क) स्यात् (ख) सर्वदा (ग) व्यवहारे

**प्रश्न:-12 ) अधोलिखितं नाट्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि निर्देशानुसारं लिखत। (5)**

**मेना**- वत्से ! मनीषिता: देवता: गृहे एव सन्ति। तप: कठिनं भवति।तव शरीरं सुकोमलं वर्त्तते।गृहे एव वस। अत्रैव तवाभिलाष: सफल: भविष्यति।

**पार्वती** -अम्ब! तादृश: अभिलाष: तु तपसा एव पूर्ण: भविष्यति ।अन्यथा तादृशं पतिं कथं प्राप्स्यामि।अहंतप: एवचरिष्यामि इति मम संकल्प: ।

**मैना** पुत्री !त्वमेव मे जीवनाभिलाष:।

**(अ) एकपदेन उत्तरत-** **(1x2=2)**

1. किं कठिनं भवति ? २.कस्या: अभिलाष: सफल: भविष्यति ?

**ब) पूर्णवाक्येन उत्तरत–** **(2x1=2)**

१. के गृहे एव सन्ति ?

**(स) भाषिककार्यम्** **(1x1=1)**

१ . 'अहं तप: एव चरिष्यामि' अत्र किम् अव्ययम् ?

**प्रश्न: 13) रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत–** 1x5=5

1. **<u>सत्येन</u>** वाति वायु |
2. रमाबाई **<u>मुम्बईनगरे</u>** 'शारदा–सदनम्' अस्थापयत्।
3. **<u>सर्वदा</u>** व्यवहारे ऋजुता स्यात् ।
4. अस्माकं **<u>त्रिवर्णध्वजः</u>** विश्वविजयी भवेत्।
5. **<u>रमायाः</u>** पिता समाजस्य प्रतारणाम् असहत।

**प्रश्न:** 14 ) **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत** – 1x5=5

1. रमाबाई–महोदयाया: विपिनबिहारीदासेन सह विवाह: अभवत् ।
2. 1922 तमे ख्रिष्टाब्दे रमाबाई–महोदयाया: निधनम् अभवत् ।
3. सा मुम्बईनगरे शारदा–सदनम् अस्थापयत् ।
4. सा स्वमातु: संस्कृतशिक्षां प्राप्तवती ।
5. 1858 तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत ।

**प्रश्न:- 15 ) मञ्जूषात: उचित संख्यापदं चित्वा रिक्तस्थानानि पूरयत–** 1x5=5

| षड् , त्रिंशत् , द्वौ , द्वादश, अष्टाविंशतिः |
|---|

(1) ___________ऋतव: भवन्ति I

(2) मासा: ___________ भवन्ति I

(3) एकस्मिन् मासे ___________ अथवा एकत्रिंशत् दिवसा: भवन्ति I

(4) फ़रवरी मासे सामान्यत: ___________ दिनानि भवन्ति I

(5) मम शरीरे __________ हस्तौ स्त: I